# abhItistavaH

# અભીતિસ્તવઃ

## Document Information

Text title : abhItistavaH

File name : abhItistavaH.itx

Category : vishhnu, vedAnta-deshika, vishnu

Location : doc_vishhnu

Author : vedAntadeshika

Proofread by : PSA Easwaran, Malathi Ravi Kuduvaa

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211, Vishnustutimanjari 3, page 263

Latest update : January 5, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 5, 2021

*sanskritdocuments.org*

# અભીતિસ્તવઃ

શ્રીગણેશાય નમઃ ।
અભીતિરિહ યજ્જુષાં યદવધીરિતાનાં ભયં
  ભયાભયવિધાયિનો જગતિ યન્નિદેશે સ્થિતાઃ ।
તદેતદતિલઙ્ઘિતદ્રુહિણશમ્ભુશક્રાદિકં
  રમાસખમધીમહે કિમપિ રઙ્ગધુર્યં મહઃ ॥ ૧॥

દયાશિશિરિતાશયા મનસિ મે સદા જાગૃયુઃ
  શ્રિયાધ્યુષિતવક્ષસઃ શ્રિતમરુદ્વૃધા સૈકતાઃ ।
જગદ્દુરિતઘસ્મરા જલધિડિમ્ભડમ્ભસ્પૃહઃ
  સકૃત્પ્રણતરક્ષણપ્રથિતસંવિદઃ સંવિદઃ ॥ ૨॥

યદદ્ય મિતબુદ્ધિના બહુલમોહભાજા મયા
  ગુણગ્રથિતકાયવાઙ્મનસિ વૃત્તિવૈચિત્ર્યતઃ ।
અતર્કિતહિતાહિતક્રમવિશેષમારભ્યતે
  તદપ્યુચિતમર્ચનં પરિગૃહાણ રઙ્ગેશ્વર ॥ ૩॥

મરુત્તરણિપાવકત્રિદશનાથકાલાદયઃ
  સ્વકૃત્યમધિકુર્વતે ત્વદપરાધતો બિભ્યતઃ ।
મહત્કિમપિ વજ્રમુદ્યતમિવેતિ યચ્છ્રૂયતે
  તરત્યનઘ યદ્ભયં ય ઇહ તાવકસ્તાવકઃ ॥ ૪॥

ભવન્તમિહ યઃ સુધીર્નિયતચેતનાચેતનં (સ્વધીનિયત)
  પનાયતિ નમસ્યતિ સ્મરતિ વક્તિ પર્યેતિ વા ।
ગુણં કમપિ વેત્તિ વા તવ ગુણેશ ગોપાયિતુઃ
  કદાચન કુતશ્ચન ક્વચન તસ્ય ન સ્યાદ્ભયમ્ ॥ ૫॥

સ્થિતે મનસિ વિગ્રહે ગુણિનિ ધાતુસામ્યે સતિ
  સ્મરેદખિલદેહિનં ય ઇહ જાતુચિત્ત્વામજમ્ ।
તયૈવ ખલુ સન્ધયા તમથ દીર્ઘનિદ્રાવશં

સ્વયં વિહિતસંસ્મૃતિર્નયસિ ધામ નૈઃશ્રેયસમ્ ॥ ૬॥

રમાદયિત રઙ્ગભૂરમણ કૃષ્ણ વિષ્ણો હરે
ત્રિવિક્રમ જનાર્દન ત્રિયુગનાથ નારાયણ ।
ઇતીવ શુભદાનિ યઃ પઠતિ નામધેયાનિ તે
ન તસ્ય યમવશ્યતા નરકપાતભીતિઃ કુતઃ ॥ ૭॥

કદાચિદપિ રઙ્ગભૂરસિક યત્ર દેશે વશી
ત્વદેકનિયતાશયસ્ત્રિદશવન્દિતો વર્તતે ।
તદક્ષતતપોવનં તવ ચ રાજધાની સ્થિરા
સુખસ્ય સુખમાસ્પદં સુચરિતસ્ય દુર્ગં મહત્ ॥ ૮॥

ત્રિવર્ગપથવર્તિનાં ત્રિગુણલઙ્ઘનોદ્યોગિનાં
દ્વિષત્પ્રમથનાર્થિનામપિ ચ રઙ્ગદૃશ્યોદયાઃ ।
સ્ખલત્સમયકાતરીહરણજાગરૂકાઃ પ્રભો
કરગ્રહણદીક્ષિતાઃ ક ઇહ તેન દિવ્યા ગુણાઃ ॥ ૯॥ (ક ઇવ)

બિભેતિ ભવભૃત્પ્રભો ત્વદુપદેશતીવ્રૌષધાત્-
કદધ્વરસદુર્વિષે બડિશભક્ષ્યવત્પ્રીયતે । (બલિશ)
અપથ્યપરિહારધીવિમુખમિત્થમાકસ્મિકી
તમપ્યવસરે ક્રમાદવતિ વત્સલા ત્વદ્દયા ॥ ૧૦॥

અપાર્થ ઇતિ નિશ્ચિતઃ પ્રહરણાદિયોગસ્તવ
સ્વયં વદસિ નિર્ભયસ્તદપિ રઙ્ગ પૃથ્વીપતે । (વહસિ)
સ્વરક્ષણમિવાભવત્પ્રણતરક્ષણં તાવકં
યદાત્થ પરમાર્થવિન્નિયતમન્તરાત્મેતિ તે ॥ ૧૧॥

લઘિષ્ઠસુખસઙ્ગતૈઃ સ્વકૃતકર્મનિર્વર્તિતૈઃ (સઙ્ગદૈઃ)
કલત્રસુતસોદરાનુચરબન્ધુસમ્બન્ધિભિઃ ।
ધનપ્રભૃતિકૈરપિ પ્રચુરભીતિભેદોત્તરૈ-
ર્ન બિભ્રતિ ધૃતિં બિભો ત્વદનુભૂતિભોગાર્થિનઃ ॥ ૧૨॥ (પ્રભો)

ન વક્તુમપિ શક્યતે નરકગર્ભવાસાદિકં
વપુશ્ચ બહુધાતુકં નિપુણચિન્તને તાદૃશમ્ ।
ત્રિવિષ્ટપમુખં તથા તવ પદસ્ય દેદીપ્યતઃ (તથા દિવિ)
કિમત્ર ન ભયાસ્પદં ભવતિ રઙ્ગપૃથ્વીપતે ॥ ૧૩॥

ભવન્તિ મુખભેદતો ભયનિદાનમેવ પ્રભો
    શુભાશુભવિકલ્પિતા જગતિ દેશકાલાદયઃ ।
ઇતિ પ્રચુરસાધ્વસે મયિ દયિષ્યસે ત્વં ન ચે-
    ત્ક ઇત્થમનુકમ્પિતા ત્વદનુકમ્પનીયશ્ચ કઃ ॥ ૧૪॥

સકૃત્પ્રપદનસ્પૃશામભયદાનનિત્યવ્રતી
    ન ચ દ્વિરભિભાષસે ત્વમિતિ વિશ્રુતઃ સ્વોક્તિતઃ ।
યથોક્તકરણં વિદુસ્તવ તુ યાતુધાનાદયઃ
    કથં વિતથમસ્તુ તત્કૃપણસાર્વભૌમે મયિ ॥ ૧૫॥

અનુક્ષણસમુત્થિતે દુરિતવારિધૌ દુસ્તરે
    યદિ ક્વચન નિષ્કૃતિર્ભવતિ સાપિ દોષાવિલા ।
તદિત્થમગતૌ મયિ પ્રતિવિધાનમાધીયતાં
    સ્વબુદ્ધિપરિકલ્પિતં કિમપિ રઙ્ગધુર્ય ત્વયા ॥ ૧૬॥

વિષાદબહુલાદહં વિષયવર્ગતો દુર્જયા-
    દ્બિભેમિ વૃજિનોત્તરસ્ત્વદનુભૂતિવિચ્છેદતઃ ।
મયા નિયતનાથવાનયમિતિ ત્વમર્થાપયન્
    દયાધન જગત્પતે દયિત રઙ્ગ સંરક્ષ મામ્ ॥ ૧૭॥

નિસર્ગનિરનિષ્ટતા તવ નિરંહસઃ શ્રૂયતે
    તતસ્ત્રિયુગસૃષ્ટિવદ્ભવતિ સંહૃતિઃ ક્રીડિતમ્ ।
તથાપિ શરણાગતપ્રણયભઙ્ગભીતો ભવાન્
    મદિષ્ટમિહ યદ્ભવેત્કિમપિ મા સ્મ તજ્જીહપત્ ॥ ૧૮॥

કયાધુસુતવાયસદ્વિરદપુઙ્ગવદ્રૌપદી-
    વિભીષણભુજઙ્ગમવ્રજગણામ્બરીષાદયઃ ।
ભવત્પદસમાશ્રિતા ભયવિમુક્તિમાપુર્યથા
    લભેમહિ તથા વયં સપદિ રઙ્ગધુર્ય ત્વયા ॥ ૧૯॥ (રઙ્ગનાથ ત્વયા)

ભયં શમય રઙ્ગધામ્ન્યનિતરાભિલાષસ્પૃશાં
    શ્રિયં બહુલય પ્રભો શ્રિતવિપક્ષમુન્મૂલય ।
સ્વયં સમુદિતં વપુસ્તવ નિશામયન્તઃ સદા
    વયં ત્રિદશનિર્વૃતિં ભુવિ મુકુન્દ વિન્દેમહિ ॥ ૨૦॥

શ્રિયઃ પરિવૃઢે ત્વયિ શ્રિતજનસ્ય સંરક્ષકે
    સદદ્ભુતગુણોદધાવિતિ સમર્પિતોઽયં ભરઃ ।

પ્રતિક્ષણમતઃ પરં પ્રથય રઙ્ગધામાદિષુ
  પ્રભુત્વમનુપાધિકં પ્રથિતહેતિભિર્હેતિભિઃ ॥ ૨૧॥

કલિપ્રણિધિલક્ષણૈઃ કલિતશાક્યલોકાયતૈ-
  સ્તુરુષ્કયવનાદિભિર્જગતિ જૃમ્ભમાણં ભયમ્ ।
પ્રકૃષ્ટનિજશક્તિભિઃ પ્રસભમાયુધૈઃ પઞ્ચભિઃ
  ક્ષિતિત્રિદશરક્ષકૈઃ ક્ષપય રઙ્ગનાથ ક્ષણાત્ ॥ ૨૨॥

દિતિપ્રભવદેહભિદ્દહનસોમસૂર્યાત્મકં
  તમઃપ્રમથનં પ્રભો સમુદિતાસ્ત્રવૃન્દં સ્વતઃ ।
સ્વવૃત્તિવશવર્તિ તત્ત્રિદશવૃત્તિ ચક્રં પુનઃ-
  પ્રવર્તયતુ ધામ્નિ તે મહતિ ધર્મચક્રસ્થિતિમ્ ॥ ૨૩॥

મનુપ્રભૃતિમાનિતે મહતિ રઙ્ગધામાદિકે
  દનુપ્રભવદારુણૈર્દરમુદીર્યમાણં પરૈઃ ।
પ્રકૃષ્ટગુણકઃ શ્રિયા વસુધયા ચ સન્ધુક્ષિતઃ
  પ્રયુક્તકરુણોદધિઃ પ્રશમય સ્વશક્ત્યા સ્વયમ્ ॥ ૨૪॥

ભુજઙ્ગમવિહઙ્ગમપ્રવરસૈન્યનાથાઃ પ્રભો
  તથૈવ કુમુદાદયો નગરગોપુરદ્વારપાઃ ।
અચિન્ત્યબલવિક્રમાસ્ત્વમિવ રઙ્ગ સંરક્ષકા
  જિતં ત ઇતિ વાદિનો જગદનુગ્રહે જાગ્રતુ ॥ ૨૫॥

વિધિસ્ત્રિપુરમર્દનસ્ત્રિદશપુઙ્ગવઃ પાવકો
  યમપ્રભૃતયોઽપિ યદ્વિમતરક્ષણે ન ક્ષમાઃ ।
રિરક્ષિષતિ યત્ર ચ પ્રતિભયં ન કિઞ્ચિત્ક્વચિત્-
  સ નઃ પ્રતિભટાન્પ્રભો શમય રઙ્ગધામાદિષુ ॥ ૨૬॥

સ કૈટભતમોરવિર્મધુપરાગઝઞ્ઝામરુ-
  દ્ધિરણ્યગિરિદારણત્રુટિતકાલનેમિદ્રુમઃ ।
કિમત્ર બહુના ભજદ્ભવપયોધિમુષ્ટિન્ધય-
  સ્ત્રિવિક્રમ ભવત્ક્રમઃ ક્ષિપતુ મઙ્ક્ષુ રઙ્ગદ્વિષઃ ॥ ૨૭॥

યતિપ્રવરભારતીરસભરેણ નીતં વયઃ
  પ્રફુલ્લપલિતં શિરઃ પરમિહ ક્ષમં પ્રાર્થયે ।
નિરસ્તરિપુસમ્ભવે ક્વચન રઙ્ગમુખ્યે વિભો
  પરસ્પરહિતૈષિણાં પરિસરેષુ માં વર્તય ॥ ૨૮।

પ્રબુદ્ધગુરુવીક્ષણપ્રથિતવેઙ્કટેશોદ્ભવા-
    મિમામભયસિદ્ધયે પઠત રઙ્ગભર્તુઃ સ્તુતિમ્ ।
ભયં ત્યજત ભદ્રમિત્યભિદધત્સ વઃ કેશવઃ
    સ્વયં ઘનઘૃણાનિધિર્ગુણગણેન ગોપાયતિ ॥ ૨૯॥

ઇતિ શ્રીવેદાન્તદેશિકપ્રણીતઃ
શ્રીમદ્વેઙ્કટનાથપ્રણીતોઽભીતિસ્તવઃ સમ્પૂર્ણઃ ।

(શ્રીરઙ્ગક્ષેત્રે)

Proofread by PSA Easwaran psaeaswaran at gmail.com

*abhItistavaH*
pdf was typeset on January 5, 2021

Please send corrections to *sanskrit@cheerful.com*